This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

गोवर्द्धनसप्तशति

Acc. No:- ~~1697~~ M1000
Title:- ~~आर्यासप्तशति~~
Subject:- poetry
Auther:- गोविंदधान
Page:- 35

KKSU LIBRARY
RAMTEK
441 106
M1000
Dist Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ॥ अंकुरितइव मनोभूर्यस्मिन्भस्मावशेषोपि ॥१॥

श्रीमत्त्रिपुरसुंदरीधुंडिराजशंकरेभ्योनमः ॥ सर्वेसाधुजनाः सदायत्तद्दशम संप्रदायाद्दलंयज्ञानायकणादक गौतममतान्यालोच्यतत्वार्थदा ॥ वेदांतान्य
रित्रीलयंतिरहसित्वानंदकंदाकरं वंदेतंजगदीश्वरं दयितयासानंदमालिंगितं ॥१॥ यत्पादांबुजमब्जभूप्रभृतयोदेवाः सदैवांतरे ध्यायंति गलपयंतिदुःख
निवृत्तंलीलामनुष्याकृतिं फुल्लेंदीवरमित्रनेत्रमतसीपुष्पावभासंसदाश्रीरामंकलयामिचेनसिचिरं चैतन्यमात्रात्मकं ॥२॥ पंचाशद्वर्णभेदैरपरिमि
ततैरर्थजातैश्चयुक्ता नानालंकाररम्यागणितगुणगणा साधुवृत्तैरुपेता ॥ वाक्सृष्टिर्यत्प्रसादात्सरतिरसनोपांतदेशेनिमेषान्निःसंचिंतेनुरक्ते वसतु
ममस्फुरवं भारतीसारसाद्या ॥३॥ गोवर्द्धनोक्तिस्फुरवदानानिदानमेतद्व्यंग्यार्थदीपनमनल्पचमत्कृतीनां ॥ भक्त्यादनंतविबुधेनविधीयमानप्रीत्यैस
दासकलपंडितमंडलीनां ॥४॥ आर्यार्थग्रहणेतावदार्याएवाधिकारिणः ॥ अतोत्रदृष्टिस्तैरेवकार्यानान्यैः कदाचन ॥५॥ गभीरार्थप्राप्तो नियतवचसा
मात्रायप्रजुषांगुणालंकाराणांभवनिघटणासत्वरतां ॥ अतोहेतोश्चेतो विपुलमतिनात्रविषयेनियोज्यंयेनांतः सततस्फुरचसंबाधवसतिः ॥६॥ संस
ज्यदोषंगुणएवदृष्टिर्विधीयतामित्यफलंवचोमे ॥ विहायनीरंसकलोपिहंसः पयःप्रगृण्हात्युपदेशतःकिं ॥७॥ विशिष्टशिष्टष्टकर्तव्यतापरिप्राप्त
मंगलमनुषंगतोव्याख्यातृश्रोतृमंगलायोपनिबध्नाति ॥ पाणिग्रहइति ॥ भूतिभूषितंभस्मनालंकृतं ॥ भस्मनोभूषणत्वंमनोभवीयत्वेन ॥ यद्वाभूत्या
ऐश्वर्येणेतिव्याख्यानं ॥ तदैशमित्यनेन गतार्थत्वात्प्रकृतानुपयुक्तत्वाच्चोपेक्ष्यं ॥ पाणिग्रहेअर्थादैशसंतानुरक्तकामिन्याः पुलकितंसंजातरोमांचं १

सात्विकभावोदयादितिभावः ॥ ऐशं ईशसंबंधि ॥ वैशादिपदवदीशपदस्यकर्पूरगौरत्वादिमच्छरीरोपहितात्मनिशक्तोगौरवाद्दूराघवान्नादृशशरीरएवशक्त
त्वान्नित्यज्ञानादिमदात्मनिलक्षणा ॥ यद्वा ॥ ईशऐश्वर्येइतिधातोरचिनिष्पन्नेशपदेनतदन्यजगत्कर्तृत्वाद्यैश्वर्यवद्बोध्यतेतत्संबंधस्यशरीरांतरेसत्वे
पिभूतिभूषितविशेषणमहिम्ना शांकरीयत्वमायातिवपुषि ॥ एवंचमनोभूभस्मसंबंधिसर्वोत्कर्षशालित्वयोग्यत्वंव्यज्यते ॥ वपुर्जयति ॥ यद्वाभूषितामित्यनेन
भूषणसामान्याभावप्रतिपादनेपिसर्वोत्कर्षशालित्वेदेवीपाणिग्रहणजन्यपुलकवत्वाहेतुः ॥ जयतीत्यनेनईशस्य सर्वोत्कर्षशालित्वप्रतिपादनेनसर्वा
त्मगतिस्वाम्येन्नपकर्षप्रतिपादनान्नतिरावेद्यते ॥ भस्मावशेषोपि एवंचांकुरीभावानर्हत्वेपितद्भवनेनदेवीपाणौस्पर्शधारूपत्वमावेद्यते ॥ मनोभूः ए
वंचमनसोबीजरूपताप्रतिपादनेनतस्यान्तर्गतत्वाद्दपुष्पांकुरवत्तो योग्यत्वंव्यज्यते ॥ विशिष्टोभाकलनीपरूपस्यापिभवनयोग्यत्वेनवपुषि विशेषभवन
योग्यत्वंवा ॥ यस्मिन्वपुषि अंकुरितइवसंजातांकुरइवेतिभस्मसंसर्गिरोमांचेअंकुरोत्प्रेक्षा ॥ एवंचयथांकुरेसंजातेमहत्तानकांक्षिसत्फलपकुत्कमफलादि
नान्यजनोपकारस्तथैतदंकुरभाविकुमारफलादिनातारकवधेनसकलजनोपकारोभावितेतिध्वन्यते ॥ अत्रांकुरितत्वेनपाणिस्पर्शस्यामृतरूपत्वंव्यक्त
व्यज्यते ॥१॥ मावमसंवृणुविषमिदमितिसातंकंपितामहेनोक्तः ॥ प्रातर्जयतिसलज्जः कंजालमलिनाधरः शंभुः ॥२॥ इदमिदमित्यनेनापलापानर्हत्वं ॥ अ
थवाजगद्दाहिनाशानाविदितविभवत्वमितिव्यज्यते ॥ विषमायमस्किंतुसंवृण्वितिसातंकं सातंकत्वंचसकलजगद्दाहिनाशेपुनस्तद्विधानेदुष्करत्वनिर्णयेन
॥ पितामहेन ॥ एवंचभ्रमयोग्यत्वंहरस्यचलज्जायोग्यत्वंध्वन्यते ॥ प्रातरुक्तः प्रातरित्यनेनकंजालेस्फुटयोग्यत्वंव्यज्यते ॥ अतः सलज्जः ननु अपत्रपावान् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ पितामहेनकज्जललेनाज्ञानात्।कज्जलमलिनाधरःनेत्रचुंबनादितिभावः।शंभुःएवंचकामिनीनांप्रीत्सतिंशालित्वंघोत्सते।जयति।पितामहसंत्रासजनकग
रलगिलनेनअत्नणःप्रार्थनयाऽस्मभगकामिनीरतचिन्हत्वेनवा॥२॥ जयतिप्रियापदांतेगरलग्रैवेयकःस्मरारातिः।विषमविशिखेविशान्निवृत्तरणंगलबद्धक
रवालः॥३॥ गरलंग्रैवेयकंकंठभूषणंयस्यसःस्मरारातिः।प्रियापदांतेजयति।एवंचकुपितकामिनीप्रसादनकर्तव्यतायाःपरमपुरुषार्थत्वंव्यज्यते।गरलग्रै
वेयकइत्यनेनजीवनायोग्यत्वंस्मरारातिरित्यनेनस्मरबाधावत्वेनक्वचिदपिसुखावस्थानायोग्यत्वंध्वन्यते।एवंचैतादृशस्यापिसर्वोत्कर्षशालित्वेप्रिया
पदांतेअवस्थितिरेवहेतुरतःप्रियापदांतावस्थितेरन्यदधिकतरत्वंनास्तीतिघोत्सते।यद्वागरलग्रैवेयकइत्यनेनजीवननिस्पृहत्वं।एवंचैतादृशस्यापिकु
पितकामिनीप्रसादनलंपटुत्वंकिमुतान्येषामितिध्वन्यते।गलबद्धखड्गःविषमविशिखे।एवंचशरणार्हत्वंव्यज्यते।शरणंयेशान्निवृत्यगच्छन्निवृत्सुलक्ष
याविषमविशिखस्यापिप्रियापदसान्निध्येनाधिकत्वंकिंपुनरन्यस्येतिघोत्सते।अतएवस्त्रीणांचरणमर्दनरतिकामतंत्रे।अन्योपिशस्त्रंगलेबध्वाशरणं
गच्छतीतिलौकिकं॥३॥ जयतिललाटकटाक्षःशशिमौलेःपक्ष्मलःप्रियाप्रणतौ।धनुषिस्मरेणनिहितःसकंटकःकेतकेषुरिव॥४॥ शशिमौलेः।ए
वंचसकलंकस्याप्येतादृशादरसंपादनेनसंतापातिभीरुत्वंध्वन्यते।तेनचकुपितकामिनीप्रसादनेवश्यकर्तव्यत्वं।पक्ष्मलःप्रशस्तपक्ष्मवान्पक्ष्मल
पदंकेतकोल्लेक्षादार्ढ्यायललाटकटाक्षःएवंचभ्रूमध्यसंबंधित्वंघोत्सते।तेनचधनुर्निहितबाणोत्प्रेक्षादार्ढ्यं।प्रियाप्रणतौप्रियाविषयकहरप्रणतौस
त्यांजयति।चाटुवचनाद्यसाध्यमानापनोदनकार्यकारित्वेनेतिभावः।स्मरेणसकंटकःएवंचनिःसरणानर्हत्वंध्वन्यते।धनुषिनिहितःनतुशरीरंपरिक्षि २

प्तः।एवंचमुष्टिबंधनदार्ढ्येणभेदनविशेषकारित्वंतेनचमानलक्ष्यभंगेअतिशीघ्रविधेयत्वंध्वन्यते।केतकेषुरिवस्मरस्यपुष्पसायकत्वादितिभावः।एवं
चमानापनोदनंव्यज्यते।केचित्तुप्रियाकर्तृकसेवाप्रणतौसमानमथविकारललाटकटाक्षोजयतीत्यपिवदंति॥४॥ जयतिजयाकिंजल्कंगंगामधुमु
द्वलयबीजमयंगलगरलपंकसंभवमंभोरुहमाननंशंभोः॥५॥ जयःकिंजल्काःनियत्रेतिरूपकंएवमग्रेपि॥५॥ संध्यासलिलांजलिमपिकंकण
फणिपीयमानमविजानन्।गौरीमुखार्पितमनाविजयाहसितःशिवोजयति॥६॥ कंकणरूपफणिपीयमानमपिकंकणपदेनप्राप्ताक्षिप्तत्वंध्वन्यते क
फणिपदेनभूषणयोग्यत्वंतेनचसर्वदाविलोकनयोग्यत्वंध्वन्यते।पीयमानमित्यनेनज्ञानयोग्यत्वंध्वन्यते।संध्यासलिलांजलिंराजदंतादिवद्दंज
लेःसलिलमितिसमासः।संध्यापदेनतदकरणेप्रत्यवायावश्यकत्वंव्यज्यते।अंजलिपदेनभूयस्त्वंघोत्सते।तेनचतत्पानस्यविलंबसाध्यत्वेनावश्यज्ञेयत्वं।अवि
जानन्।अत्रहेतुमाह।गौरीमुखार्पितमनाः।गौरीत्यनेनमनःसंलग्नतायोग्यत्वंमुखेध्वन्यते।अर्पितपदेनप्रत्याहरणायोग्यत्वंध्वन्यते।एवंचैतादृशविषयज्ञा
नाभावेनात्यंतासक्तिःगौर्यांगिरीशस्यव्यज्यते।अतएवविजयागौरीसखीतयाहसितःशिवोजयति।एतादृशोपरिहासस्याप्युत्कर्षाधायकत्वादितिभावः
॥६॥ प्रतिबिंबितगौरीमुखविलोकनोत्कंपशिथिलकरगलितः।स्वेदभरपूर्यमाणःशंभोःसलिलांजलिर्जयति॥७॥ सलिलांजलिर्जयति।एवंचांजलि
जलप्रतिबिंबितगौरीवदनविलोकनसंजातकंपरूपसात्विकभावविश्लथकरगलितत्वेपिस्वेदरूपसात्विकभावभराकस्मिकपूरणात्सर्वोत्कर्षशा ३
लित्वमितिभावः॥७॥ प्रणयकुपितप्रियापदलाक्षासंध्यानुबंधमधुरेंदुः।तद्वलयकनकनिकषग्रावग्रीवःशिवोजयति॥८॥ प्रणयेननयास्तवंकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंच सहसामानिनी चरणेमस्तकस्थापनेपिभीतिरित्याविद्यते। एतादृशी हरचंद्ररेखा जयति। पुद्नेककादना।

पिताया प्रिया। एवंच चरणप्रणामयोग्यत्वं ध्वन्यते। तस्याश्चरणलाक्षारूपसंध्यासंबंधरुद्रश्चंद्रोयस्य। तस्याः पार्वत्याः कंकणकनकस्यनिकषोपलरूपाग्री
वायस्य। एवंच मानापनोदनात्कंठग्रहपुरःसरमालिंगनादिध्वन्यते। एतादृशः श्रीबीजयतिप्रियाप्रसादादितिभावः। यद्वा। स्वकार्योद्देशाविहितप्रियाप्रणामेनसं
ध्याचंद्रमसोरपिसंगमसंपादनायासेनपरोपकारित्वलाभादितिभावः॥८॥ पूर्णनखेंदुद्विगुणितमंजीराप्रेमश्रृंखलाजयति। हरशशिलेखागौरीचरणांगुलिमध्यगु
ल्मेषु॥९॥ गौर्याश्चरणांगुलिमध्यगुल्मेषु अत्रमध्यस्यांगत्वाभावान्नैकवद्भावः। मध्यमपदलोपीसमासोवा। पूर्णः नखेंदुर्ययापूर्वैर्नखचंद्रस्यार्धचंद्रत्वादितिभा
वः। द्विगुणीकृतं मंजीरं यया। पूर्वंमंजीरस्यैकगुणत्वादितिभावः। प्रेम्णः श्रृंखलायया पूर्वंस्वर्णाभरणांतरवत्वेपिप्रेमास्थितिसंपादकाभिनवभूषणत्वादितिभा
वः। एवंच यथा मानापनोदनं तथा शरीरश्चरणसंयोगाधिकतरः संवृत्त इतिभावः॥९॥ श्रीकरपिहितंचक्षुः सुखयतुवः पुंडरीकनयनस्य। जघनमिवेक्षितुमागत
मब्जनिभं नाभिसरसिरेण॥१०॥ पुंडरीकनयनस्यविष्णोः श्रीकरपिहितं स्तनीतिवसनविहीनतयालज्जावशादितिभावः। श्रियः करेणनतुश्रिया। आनंदातिभार्या
नव दितिभावः। अतएव करोतीतिकरः इतिकरपदमन्वर्थं। ततोनाभिरंध्रेणसुषिरपदमन्यागिकनीयत्वं व्यनक्ति। जघनमीक्षितुमागतमागतमिवेत्युत्प्रेक्षा। एवंच ल
क्ष्मीजघनदर्शनलालसत्वं व्यज्यते। पिधानानर्थक्यं च। अब्जसदृशं। एवंच नाभिकमलभ्रांत्यापिधानायोग्यत्वमावेद्यते। चक्षुर्युष्मान्सुखयतु। पिहितेपिदि
तेपिहिगोलकेन्यमार्गेणागतस्य जघनविलोकनकारितयासुखलं पटत्वे सुखदानस्य सुखप्राभिनिदानतयान्यस्यसुखजनकत्वंतस्येतिभावः। ननुचेत्पुंड
रीकनयनस्येत्यनेनकमलसादृश्यसिद्धावब्जनिभमित्यस्यनतथाप्रयोजनमितिचेन्न। पुंडरीकनयनमित्यस्यरूढिरेव। यद्वा। अब्जपदस्यचलकृतात्पर्यान्यथा ३

नुपपत्त्यारक्ताब्जेलक्षणा। एवं लक्ष्म्याः सितांभोजत्वेननेत्रज्ञानेपिरक्तांभोजत्वेनाज्ञानात्। तदुपांगीकारेणनिभृतमार्गेण गमनेनजघनदर्शनकारित्वेपिश्रीकरा
पिहितत्वमितिव्यज्यते। अन्योपिअत्यंतलंपटोरूपांतरेणनिभृतमार्गेणचगत्वास्वकार्यंसाधयतीतिलोकिकं। केचित्तु। रक्तमित्युक्तेरक्तरत्नमेव। अब्ज
मित्युक्तेरक्ताब्जमेवोपलक्ष्यते कविसंप्रदायादितिवदंति॥१०॥ श्यामश्रीकुचकुंकुमपिंजरितमुरोमुरद्विषोजयति। दिनमुखनभइवकौस्तुभविभाकरोयद्वि
भूषयति॥११॥ श्यामविष्णोः श्यामत्वादितिभावः। श्रीकुचकुंकुमपिंजरितं। एवंचदृढालिंगनमपिव्यज्यते नन्मुरद्विषउरः। एवं चकठिणत्वमुरसिव्यज्यते।
तेनश्रीकठिणकुचकुंभसंघट्टणसहिष्णुत्वं जयतिसर्वोत्कर्षेण लक्ष्मीदृढालिंगनहेतुः। दिनमुखनभइवप्रातःकालीननभःस्वतोनीलिमत्वात्संध्यासंवलित
त्वाच्च। तथाविधोरसःसादृश्यं। कौस्तुभएवविभाकरः पक्षे कौस्तुभवद्विभाकरः सूर्यः यदुरोविभूषयति एवंचत्रिभुवनाधिपतेर्निरीहस्यापिकौस्तुभाभरणधा
रणमुदरवर्तिनैकलोकयुगपत्प्रकाशविश्रांतिविधाननिधानतांध्वनयति। एवंचविभाकरादतिशयोव्यज्यते कौस्तुभे॥११॥ प्रतिबिंबितप्रियातनुसकौ
स्तुभजयतिमधुभिदोवक्षः। पुरुषायितमभ्यसतिलक्ष्मीर्यद्वीक्ष्यमुकुरमिव॥१२॥ सकौस्तुभंअतएव प्रतिबिंबिताप्रियायास्तनुर्यत्रायन्मुकुरमिववी
क्ष्यलक्ष्मीः पुरुषायितंविपरीतरतमभ्यसतितन्मधुभिदोवक्षः एवंचदार्ढ्यमावेद्यते। स्वच्छताविशेषोवाजयति। लक्ष्म्याः पुरुषायिताभ्यासनिदानत्वेन
सर्वोत्कर्षहेतुः। अन्योप्यादर्शेप्रतिबिंबमवलोक्यैवान्यानवलोकनीयचेष्टाविशेषाभ्यासंकरोतीतिलौकिकं॥१२॥ केलिचलांगुलिलंभितलक्ष्मीना
भिर्मुरद्विषश्चरणः सजयतियेनकृतात्रीरनुरूपापद्मनाभस्य॥१३॥ क्रीडाचपलांगुल्यालंभितः स्पृष्टोलक्ष्म्याश्चरणसेवाकारिण्यादितिभावः। नाभिर्येन

(5)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो॰ टी॰
६
निषेविता

अतएवयेनश्रीःपद्मनाभस्यानुरूपा। चरणरूपपद्मनाभित्येनेतिभावः। कृत्वा। सःमुरद्विषश्चरणोजयति। ब्रह्मणोप्यसाध्यकार्यकरणादितिभावः॥१३॥ रोमाव
लीमुरारेःश्रीवत्सोग्रभागाबः। उन्नालनाभिनलिनच्छायेवोतापमपहरतु॥१४॥ मुरारेः एवंचसामर्थ्यमभिव्यज्यते। तेनचतद्वत्सेपिभृगुचरणहननसहिष्णु
त्वेनक्षमातिशयत्व। श्रीवत्सेनभृगुचरणचिन्हेननिषेवितत्वात्संबंधव्यानित्यर्थः। अग्रभागोयस्याः साएतादृशी रोमावली उत्तुध्वंनालंयस्याः एवंयन्ना
भिनलिनंतच्छायेव। एवंचरोमावल्यांनालच्छायोत्प्रेक्षा। श्रीवत्सेचनलिनछायोत्प्रेक्षा वः उत्तापमहासंतापंहरतु। कमलछायायाः संतापनोदकत्वादितिभा
वः॥१४॥ आदायसप्ततंत्रीचितांविपंचीमिवत्रयींगायन्। मधुरतुरंगवदनोचितंहरिर्जयतिहयमूर्धा॥१५॥ सप्तसंख्याकानांतंत्राणामग्निष्टोमादीनां
समाहारःसप्ततंत्री तद्व्यामाणांतत्प्रतिपादनपरामितियावत्। तंत्रप्रधानेयागेचेतिविश्वः। पक्षेतंत्रीकोहलंतुविशेषःत्रयींविपंचीमिवादायमधुरतुरं
गवदनानांगंधर्वाणांउचितंयोग्यं। एवंचेतादृशगानकर्तृत्वाभावस्तेषामितिव्यज्यते। गायन्हयमूर्धाहयग्रीवः एवंचतुरंगवदनोचितगानकर्तृत्वं
हरिर्जयति। एतादृशाविलक्षणगानगुणेनरूपेवत्वादिति॥१५॥ सजयतिमहवराहोजलनिधिजठरेचिरंनिमग्नापि। येनांगेरिवसरूफणिगणैर्वसुधानु
स्यूताधरणी॥१६॥ येनजठरउधिजठरेडल्लमोरत्नाजडनिधित्वेनधरणिस्थानदानयोग्यत्वा। चिरमित्यननऋगितिनिःसरणायोग्यत्वंव्यज्यते। निमग्ना
पिअंत्रेरिवफणिसमूहैः सहबलात्कारेणधरणीउद्धृता समहावराहः एवंचेतदृष्ट्रायाःअंतेदन्तवक्रत्वाभ्यांजठरांतर्गतत्वेनांत्ररूपफणिसमूहस
हितधरोद्धारसामर्थ्यमुचितमितिव्यज्यते। जयति। अनन्यसाध्यकार्यकरणादितिभावः॥१६॥ ब्रह्मांडकुंभकारंभुजंगाकारंजनार्दनंनौमि॥ स्फारय ६

स्फुणचक्रेधराशरावश्रियंवहति॥१७॥ चंडीजंघाकांडःशिरसाचरणस्थशिप्रियेजयति॥ शंकरपर्यंतजितोवीरस्तंभःस्मरस्यैव॥१८॥ ब्रह्मांडंकुंभस्तंकरो
तीतितं एवंचयथाकुंभकारस्यकुंभकरणेनकुलालेशक्तथास्यब्रह्मांडकरणइतिव्यज्यते। भुजंगाकारइवाकारोयस्यतं। एवंचवास्तवैतद्रूपंयाथातथ्येन
निर्णेतुमशक्यमितिव्यज्यते। जनार्दनं। एवंचएतद्भीतिरक्षयंविधेयेतिध्वन्यते। तेनचैतद्दोषानोकुघनीयेति। स्फारे एवंधराशरावश्रीसंपादनयोग्यत्वंव्य
ज्यते। यस्यफणसमूहेधरा। एवंचमहत्तरत्वंव्यज्यते। शरावस्यस्वल्पमृद्भाजनविशेषस्यश्रियंवहतितत्तुल्यादृश्यतइतिभावः। एवंचपरमेश्वरभुजगरू
पस्यातिविशालत्वंध्वन्यते। अन्यस्यापिकुलालस्यचक्रेशरावोभवतीतिलौकिकं। अत्रधराशरावश्रियंवहतीसेतावतैवफणचक्रेस्फारत्वसिद्धावु
भमकाव्यत्वेस्फारपदोपादानमनुचितमित्याभाति॥१७॥ प्रियेशंकरेशिरसाचरणस्थेशिकोपापनोदायप्रणतिकारिणिसतिशंकरमभिव्याप्यजयव
तःस्मरस्यजयस्तंभइवचंडीजंघारूपःकांडोवंशोजयति। स्वतःस्फुरत्वविशेषजनकतयातुच्छविषयस्फुरत्वपरात्मुखत्वस्याप्येतादृशरूपवस्थासंपादनादितिभावः
एवंचैहिकामुष्मिकस्फुरत्वापेक्षयासीमंतिनीसंगमस्फुरत्वेधिकतरत्वमावद्यते॥१८॥ उन्नालनाभिपंकेरुहइवयेनावभातिशंभुरपि। जयतिपुरुषायितायाः
सादाननंगौरकन्यायाः॥१९॥ येनशंभुरपिअपिनाविष्णोरनवतारत्वेननाभिपंकेरुहत्वलाघोग्यत्वंव्यज्यते। ऊर्ध्वनालंयन्नाभिपंकेरुहंतद्वानिव। पद्माधि
ष्ठुरिवेत्यर्थः। एवंचशरीरस्यनालसाम्यदर्शनात्कृशांगीत्वमभिव्यज्यते। आभाति। पुरुषायितायाः शैलकन्यायाः। एवंचदार्ढ्यंतेनचपुरुषायितसंपादनयो
ग्यत्वंध्वन्यते। तदाननंजयति। अघटितघटनापटुत्वादितिभावः॥१९॥ अंकनिलीनगजाननशंकाकुलबाहुलेयहृतवसनौ। सस्मितहरकरकलितौहिम
गिरितनयास्तनौजयतः॥२०॥ अंकेनिलीनोयोगजाननस्तस्यशंकयास्तनयोःकुंभिकुंभसाम्यादितिभावः। आकुलःकथंमांविहायेनमेवसंगोप्यबहुकालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो॰ टी॰
५

स्तन्यंप्रमग्छतीतिधियेतिभावः। यद्वा। नयनपिधानक्रीडायांगजाननोकंएवनिलीनोनत्वन्यत्रगतइतिमत्वेतिभावः। आकुलपदेनस्त्रीभ्रमविचारि
तकार्यकारित्वंव्यज्यते। योबाकुल्येयस्तारकजितेनेहमवसनोगजाननन्निर्णयार्थमितिभावः। सस्मितः कथमानिगुमयोरत्याकस्मिकप्राकट्यमितिधि
येतिभावः। योहरः एवंचत्वतएववसनहरणादिनानत्कार्यकारित्वंध्वन्यते। तेनकरकलितोकरोतीतिकरइतित्वतस्तत्कार्यकारित्वेपिहरप्रेरितत्वेना
कल्लनेदार्द्यंघोत्यते। हिमगिरितनुयायाः एवंचश्रेसुसहितकठिणत्वंव्यज्यते। तेनचाव नृपकफरकल्लनयोग्यत्वं अतएवहरेसस्मितत्वेपिमुक्तः। स्त
नौजयतः। भ्रमयतान्येनापिधृतत्वेप्यन्यस्यकरत्वसंपादनादितिभावः। यद्वा गजाननात्रिरविबाहनयोः सकलविघ्ननिवारकत्वकार्यमात्रपुरस्करणी
यत्वतारकवधद्वारकविश्वसंतोषपोषकत्वनिदानस्तन्यवत्वत्वादितिभावः। यद्वा स्मरवैरोधिनोप्यानदजनकत्वादितिभावः॥२०॥ कंठेचिनोपिद्वक्ष
तिमात्रनिरस्तः पदातिकेपतिनः। यस्याश्चंद्रशिरवः स्मरभल्लनिभोसंजयतिसाचंडी॥२१॥ आलिंगनार्हेपिपक्षेर्धचंद्राकारतयाकंठलक्ष्ययोग्यो
पिहुंकृतिमात्रेणनतुकरतर्जनादिनापक्षेनवा बाणादिनानिरस्तः अतएवयस्याःपादांतिकेप्रणामार्थमितिभावः। पक्षेवेगाधिनाशादितिभावः। स्मार
शरसदृक्षः अर्द्धचंद्रशिरवरत्वादितिभावः। स्मरभल्लनिभइत्यनेनमानापनोदनसमर्थत्वंद्योत्यते। यद्वा। स्मरभल्लस्यानिभंछद्मयस्मिन्सः। निभंछद्म
सदृक्षापोरित्याभिधानात्। एवंचरूपांतरसंपादनाद्वीर्यातिशयोद्योत्यते। चंद्रशिरवः शंभुःपतितः। चंद्रशेरवइत्यनेनोद्दीपकचंद्रस्यापिमानापनोदके
त्वान्मानेबाकुल्यमभिव्यज्यते। साचंडीजयति। मदनार्धनारीचादीनामप्यगणनादितिभावः॥२१॥ देवेर्पितचरणत्वजिव्याकुल्मायव्हतिकेरभीरूपं। जयति
करास्करहसिताल्लज्जाजितल्मीक्षणालक्ष्मीः॥२२॥ आर्पितचरणस्त्रजि। एवंचसंगाद्यभावेननास्तिकरूपापरिचयोद्योत्यते। व्याकुल्मायेएवंचरूपांतरस्य ५

रूपसामर्थ्यमभिव्यज्यते। देवेविष्णौ। देवपदेनक्रीडारसिकतयानेकविधदेहधारणनिपुणत्वमावेद्यते। केरभीरूपंदैत्यवंचनायेतिभावः। व्हतिसाति। एवं
चप्रात्यक्षिकत्वेनापलापानर्हत्वंव्यज्यते। करास्करहसिताकथंसर्वकरास्कराणांविहायमीदृशोगृहनइति। अतएवलज्जाकुटिलेक्षणाक्किमियंकामिन्येवपु
रस

रुषभ्रमान्मयावृतेतिधियेतिभावः। लक्ष्मीर्जयति। सर्वोपहासत्वेप्यधैर्याकरणादितिभावः॥२२॥ तानस्करानपिहरिमपितंवंदेकपटकैटभीरूप।
येयेहिंबाधरमधुलुब्धैः पीयूषमपिमुमुचे॥२३॥ तान्स्करपटत्वेनप्रसिद्धान्सुरान्कपरांतीतेस्करास्तादृशान्सर्वदा। समीचीनग्राहकानपिवंदे। पीयू
षादप्याधिकमेतस्याधरामृतमितितात्विकज्ञानेनसमीचीनवस्तुग्राहकत्वादितिभावः। तंकपट ग्रन्यत्वेनप्रसिद्धंकपटकैटभीरूपंहरिमपिवंदे। कप
टज्ञानेपिकपटाकारदैत्यवंचनानिपुणकपटरूपधारणादितिभावः। येरस्करैर्यस्याःकैटभ्यालब्धस्याअधरमधुनिलुब्धैर्मधुपदमुन्मादजनकतांव्यनक्ति
।पीयूषमपि। एवंचपरित्यागानर्हत्वेपितत्कारणेनकैटभीरूपविशेषत्वाधिक्यंध्वन्यते॥२३॥ तल्पीकृताहिरगणितगरुडोहाराभिहतविधिर्जयति॥ फ
णशतपीतश्वासोरागांधायाःश्रियःकेलिः॥२४॥ तल्पीकृताहिरेवंचसर्पबाधायाअप्यगणनेनरागातिशयोव्यज्यते। अगणितगरुडः। एवंचसर्वज्ञ
मनयोग्यत्वेनपक्षित्वेनाविवेकश्रन्यतयावान्यत्रैतत्कथनयोग्यत्वेप्यतदगणनयापिस एवद्योत्यते। हाराभिहतविधिः। हारस्यनाभिसंबंधादितिभा
वः। आलिंगनांतरभूतहारस्यत्यागानर्हत्वेपितदुपर्येवप्रक्षेपणकेलिज्ञानसंपादनेनलज्जाशून्यत्वेनसएवावेद्यते। यद्वा। कथमद्यापिनापसरतीति
क्रोधाल्लिकरवानिहाराभिहननेनहारापायभीतिशून्यत्वेनायचक्रोधात्कुत्रकुत्रनवाक्षिप्यतीतिज्ञानहीनतयासएवावेद्यते। ज्ञातसंख्याफणपीनश्वा 6
सः। एवंचान्याभिरंगनाभिर्यद्रागप्रकट्यंनक्रियतेतन्मिथ्येतिभावः। जयति। एतादृशाप्रतिबंधकसमूहेपिसजायमानत्वादितिभावः। अत्रतल्पीकृता
एवंचसंख्यायाः पानान्वयोनसंभवतीतिदूषणमपास्तं। एवंचमरणभीतिशून्यत्वेनसएवध्वन्यते। एवंविधःरागांधायाः केलिः॥२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरित्यादिनाव्यंजनयारागातिशयप्रतिपादनाद्रागांधायाइत्यस्यनतथाप्रयोजनमित्याभाति॥२४॥स्मेराननेनहरिणासस्पृहमाकारवेदिनाकलितं॥जय
तिपुरुषायितायाःकमलायाकैटभीध्यानं॥२५॥स्मेरंकिंचिद्धास्यवन्मुखंयविशेषविभ्रमार्थादितिभावः।यदाननंअर्थाल्लक्ष्म्यास्तेनकृत्वाआकारवेदि
नास्मेराननरूपज्ञापकज्ञानवताहरिणाआकलितमनुमितंस्मेराननेतिहरिणेत्यस्यापिविशेषणं।विपरीतकारिण्याःश्रियःसस्पृहं।एवंचत्वस्या
पिस्वदरसोपितद्विषयस्पृहावत्वेनानिर्वचनीयरूपशालित्वंकैटभ्यांव्यज्यते।कैटभीध्यानंएवंचास्त्रियोपिस्त्रीध्यानइतत्त्वंकैटभीत्वपद्योसूते
जयतित्रिभुवनाभिरामयारमयापिक्रियमाणत्वादितिभावः॥२५॥श्रुतकांतकेलिकुतुकश्रीशनिश्वाससेकनिद्राणःघोरितविततालिकृतोना
भिसरोजेविधिर्जयति॥२६॥श्रुतंकांतमनोज्ञंयत्केलिकुतुकं।एवंचोत्साहविशेषणस्फुरत्वसंपादनात्श्वासवाकुल्यंव्यज्यते।पनुकांतेनविष्णुनास
हयत्केलिकुतुकमितितन्न।अन्येनसहप्रसक्तेःकांतकेलिरित्यनेनस्फुरतक्रीडेवयातीसपि न।अक्षक्रीडादेःसंभवात्।नाभिसरोजइत्यादिनैवे
तत्प्रतीतेश्च।पर्यंताद्दूरीयाश्रीस्तस्याःशीताःमदनानलसंतापनिर्वृत्तिरितिभावः।प्रेश्वासास्तेषांसेकेननिद्राणःसेकस्यद्रवद्रव्यीयत्वेनश्वासे
वाधाद्दूरेवारसंबंधोलक्ष्यते।तेनचस्फुरत्वानिद्रायोग्यत्वंव्यज्यते।विततालिकृतमेवबध्य।घोरितंयस्य।नाभिसरोजेविधिर्जगन्निर्माणकर्ताए
वंचश्रमवत्वान्निद्रायोग्यत्वंव्यज्यते।जयतितरोजशयनश्रीतमंदस्कगंधसमीरणस्फुरत्वस्योपकारत्वादितिभावः॥२६॥एकरदद्वैमातुरनिस्त्रि
गुणचतुर्भुजापिपंचकर।जयषण्मुखनतसप्तच्छदगंधिमदष्टतनुतनय॥२७॥एकदंतद्वैमातुरपार्वतीगंगारूपमातृद्वयवत्त्वात्।निस्त्रिगुणए
वंब्रह्मरूपत्वंघोत्यते।चतुर्भुजापिपंचकर।अपिर्विरोधाभासात्मकः।शुंडामादायपंचकरत्वंअन्यथातुतस्यास्तिचतुर्भुजत्वं।षण्मुखनुत

ज्येष्ठत्वादितिभावः।सप्तच्छदगंधमदोयस्य।अष्टतनुर्महादेवस्तत्तनयः।एतादृशस्त्वंजय।संख्याक्रममात्रमत्र॥२७॥मंगलकलशद्वयमयकुंभमदंभेनभजतांग
जवदनं॥यद्दानतोयतरलैस्तिलतुलनालंबिरोलंबैः॥२८॥मंगलकलशद्वयरूपौकुंभौयस्यतं।एवंचविघ्नविनाशनक्षमत्वंध्वन्यते।गजवदनंअदंभेन।एवंचद
भेनभजनमनर्थकमित्यावेद्यते।यदीयदानोदकार्थंचंचलैःसौरभ्यशालित्वाद्दानोदकस्येतिभावः।तरलपदेनसकलकुसुमगंधाधिकत्वंदानगंधेव्यज्यते।रोलं
बैर्भ्रमरैस्तिलसाम्यं।श्यामत्वादितिभावः।एवंचकुंभयोर्महत्तरत्वंध्वन्यते।आलंबिगणपतिविषयकोत्रभावध्वनिः॥२८॥याभिरनंगःसांगीकृतः।त्रियोप्यस्त्रीकृ
ताश्चवतायेन।वाम्याचरणप्रवणौप्रणमततौकामिनीकामौ॥२९॥याभिःस्त्रीभिरनंगोमदनःसांगीकृतःस्वयंतत्साहाय्यसंपादनादितिभावः।येनमदनेनताःस्त्रि
यःअस्त्रीकृताःस्वविजयसाधनत्वेनेतिभावः।इतिवामस्यपरस्परस्यसमीचीनस्येतियावत्।पराचरणसमीचीनाचरणमित्यर्थः।तत्रप्रवणौतत्परौ।एवंचा
गहीनस्यांगतासंपादनादेवमेवस्त्रीत्वेननायकाधीनानांस्त्रीणांस्वतंत्रास्त्ररूपतासंपादनेननायकस्यतदधीनत्वसंपादनादुपकारप्रवणत्वंउभयोर्व्यज्यते।अतए
वैतादृशौकामिनीकामौप्रणमत।एवंचैतत्समयसेवयासमीचीनमेवभविष्यतीतिध्वन्यते।पत्नुअंगरहितस्यांगवत्तासंपादनात्स्त्रीणांचस्त्रीभिन्नत्वसंपादनाद्वि
रुद्धाचरणस्वाभाव्यात्कामिनीकामौप्रणमत।एवंचैतयोःसंगतिःसतांनोचितेतिव्यज्यतइतिव्याख्यानंमंगलप्रकरणविरोधादसमंजसमिवाभाति।यद्वा।परे
स्परमप्यतयोरीदृशाविपरीताचरणप्रवणत्वेनान्यस्यतत्कारणस्याभिरूगमत्वादेतत्सेवयैवसमुचितेतिध्वन्यतइत्यर्थः॥२९॥विहितघनालंकारांविचित्रवर्णा
वलीमयस्फुरणं।शक्रायुधमिववक्रंवल्मीकभुवकवियेनौमि॥३०॥शक्रायुधमिवविहितावयधनात्मकवःअलंकारात्पमादयोयेनतं।पक्षेविहितमेवालंकर 7
णं।विचित्राणांवर्णानांअक्षराणांयाआवल्लीतन्मयस्फुरणंस्फूर्तिर्यस्यतं।पक्षेवर्णानीलपीतादयःतत्संविकारःस्फुरणमुत्पत्तिर्यस्यतं।वक्रकाकिकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो.टी.
७

शालं। पक्षे पथाश्रुतं वल्मीकभुवं वाल्मीकिं शत्रुघ्नपोषितं तत एवोत्पन्नैरिति लौकिकं। कविं काव्यकर्त्तारं नौमि। रूपकमत्रालंकारः॥३०॥ व्यासगिरां निर्यासं
सारं विश्वस्य भारतं वंदे। भूषणतयैव संज्ञां पदं किंतां भारती वहति॥३१॥ व्यासवचसां निर्यासं स्वच्छतत्त्वार्थयत्वं सारस्त्वं च व्यज्यते। विश्वस्य जगतः सारं ए
वं चतुर्विधपुरुषार्थसाधनत्वं ध्वन्यते। एतादृशं भारतं वंदे। यदंकितां भारतनिबद्धितां संज्ञां भूषणतयैव भारती सरस्वती वहति। एवं च भारत्या भू
षणरूपतया भारतप्रसिद्धनामवत्वप्रतिपादनेन सर्वग्रंथाधिकत्वमावेद्यते भारते। एवकारेण स्वाभाविकत्वव्युदासः। अन्योऽप्यप्रसिद्धः प्रसिद्ध
स्य कस्याचिन्नाम्ना प्रसिद्धो भवतीति लौकिकं। भारतकर्तृत्वेन व्यासस्तुतिरित्यवधेयं॥३१॥ सति काकुत्स्थकुलोन्नतिकारिणि रामायणे
किमन्यकाव्येन॥ रोहति कुल्यागंगापूरे किं वकुरसे वहति॥३२॥ काकुत्स्थानां कुलं तदुन्नतिकारिणि कुलपदेन सर्वेषामप्युन्नतिसंपादने
नत्रातकोटिप्रविस्तरत्वेन च तत्कृतप्रमेयवत्त्वं च व्यज्यते। बकुरसे प्रभृतशृंगारादेरसे शालिनि पक्षे बकुजलवति। एवं च तापापनोदकत्वं
व्यज्यते। अत एवैतादृशे रामायणे सति अन्यकाव्येन किं तेन गतार्थत्वादिति भावः। अत्र दृष्टांतमाह। गंगापूरे वहति सति कुल्याल्या कृत्रिमा
सरित् किं रोहतीति काक्वा नेत्यर्थः। नचैतत्पथमवतरतीति॥३२॥ अतिदीर्घजीवदोषाद्व्यासेन यशोपहारितं हंतो कैर्नोच्यते गुणाढ्यः स एव ज
न्मांतरमापन्नः॥३३॥ अत्यंतदीर्घजीवित्वदोषात् चिरकालजीवित्वरूपदोषादित्यर्थः। अतिचिरजीवित्वस्यास्य चागुणत्वेऽप्यत्र दोषत्वमिति भावः॥
दोषपदं परिहरणीयत्वं व्यंजयति। व्यासेन यशः हतं इति खेदे अपहारितं। यशः पदमसंतसंभूर क्षणीयत्वं व्यंजयति। अत एव खेदोक्तिः। एत
देवाह। स एव व्यासः एव जन्मांतरमापन्नः गुणाढ्यः बृहत्कथाकर्त्ता कैर्नोच्यते। अपितु सर्वैरित्यर्थः। एवं गुणाढ्यव्यवहारो व्यासस्य चिरजीवि

त्वमेव प्रतिबंधकं संवृत्तमिति भावः। एवं चैतादृग्यशोपहारः न कृतः किंतु चिरजीवित्वमिति महत्त्वं सर्वत्व मावेद्यते व्यासेन च व्यासाधिकत्वं गु
णाढ्ये॥३३॥ श्रीरामायणभारतबृहत्कथानां कवीन्नमस्कुर्मः॥ त्रिस्रोता इव सरसा सरस्वती स्फुरति यैर्भिन्ना॥३४॥ वाल्मीकिव्यासगुणाढ्यान्न
मस्कुर्मः। यैर्वाल्मीक्यादिगुणैर्भिन्ना विलक्षणरीत्यनुसरणवादिति भावः। सरसा शृंगारादिमती पक्षे सजला सरस्वती वाणी नदी च त्रिस्रोता इव
गंगेव स्वर्गमृत्युपातालेषु प्रवाहवत्त्वाद्गंगायाः। एवं च वाल्मीक्यादिवाचां सकलकल्मषविनाशकत्वं द्योत्यते। स्फुरति। एवं च त्रितयवाचां वारुत
वैकरूपवत्त्वमवेति व्यज्यते। तेन च वाल्मीक्यादित्रितयस्य समानत्वमावेद्यते। यद्वा। वाल्मीक्यपक्षपातकिंचिन्न्यूनत्वं व्यासे ततो गुणाढ्य इति ध्व
न्यते। पूर्वत्र श्रीपदं त्रिष्वप्यन्वेत्यनु रामायणमात्रे॥३४॥ साकूतमधुरकोमलविलासिनीकंठकूजितप्राये॥ शिक्षासमयेऽपि मुदे रतलीलाकालि
दासोक्ती॥३५॥ साकूतं साभिप्रायं मधुरं सोत्कर्षाधायकरसनिष्ठगुणवत् कोमलं श्लक्ष्णगुणशालि एतादृशं पुंविलासशालिन्याः कंठकूजितं तत्प्रा
ये। प्रायः शब्दः क्रमेण बाहुल्यसादृश्योपस्थापकः। रतलीला कालिदासोक्ती शिक्षासमयेऽपि मुदे। एवं चोभयोः समत्वमिति भावः। एवं च सम
वचनस्याप्युपदर्शसमयेन कुतो धाटुः रवदत्वेन रतलीला कालिदासोक्त्योः स्वप्रदत्वेन वा च॥साधिक्य ध्वन्यते॥३५॥ भवभूतेः संब
धाद्भूधरभूरेव भारती भाति। एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा॥३६॥ भवभूतेः शिवैश्वर्यस्य संबंधाद्भारत्येव सरस्वत्येव भूधरभूः नगेंद्रक
न्याभाति। एवं चाणिमाद्यैश्वर्यागतेच्छानभिधानरूपप्राकाम्याद्भारत्याः नगेंद्रकन्यारूपत्वं। तथा भवभूतेः कवेः एवं चैश्वर्यो भवपाभिद्योधनेन

8

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वेच्छानुरूपकार्यकारित्वं व्यज्यते। संबंधाद्भारस्येव भूधरभृतः पर्वतभूमिः। एवं च नान्यथाशंकनीयमिति भावः। भाति। अन्यथा एतत्कृतक
रुणारसप्रधाने। अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयं तु सुन्दरचरित्री यपद्येग्रावा शैलः ग्रावाणो शैलपाषाणानिलमरः। किंमिति रोदिति।
यद्वा। भवभूतेः संबंधादिस्तस्य भवेश्वर्यादिनाभावादित्यर्थः। भूधरभृतः शैलतनया भारती भाति। सरस्वतीरूपेण इत्यर्थः। एवं च यत्र ईशैश्वर्यमत
त्र शैलसुतायाः अवश्यं स्थेयमिति नियमादीशैश्वर्यवाणीकवौ शैलसुता सरस्वतीस्वरूपेणावस्थितेति भावः। एवं चैतत्कवेर्दक्षिणामूर्त्युपासकत्वं
व्यज्यते। अत एव भवस्य सांबस्य भूतिरैश्वर्यं यस्मिन्निति नाम्नि व्युत्पत्तिरपि संगच्छते। अथवा कवौ भवभूतौ भेदबोधनेन पार्वती सत्वभावरूपकं
विपक्षतर्कमाह। अन्यथा एतत्कृतकारुण्ये एवं चान्यैर्बहुभिः करुणारसप्रधानकाव्यानि विहितानि परं तु न तत्र शैलरोदनमिति भावः। ग्रावापि मि
ति रोदिति। एवं चैतत्कृतकारुण्ये जामातृसंबंधेन शैलस्यापि रोदनमिति भावः। अथवा भवभूतेः शिवैश्वर्यसंबंधात्तत्कृपात इत्यर्थः। भारती अ
[?] भूरेव भूधर इति कविनाम भवभूतिरिति। गिरिजायाः कुचौ वंदे भवभूतिसिताननौ। इति पद्यकरणोत्तरपदवी नाम तस्मादुद्भवत्वेद्दरूपेव जाता। ए
वं च सरस्वती प्रचारस्तत एव सत्यकविव्यतिरेको ध्वन्यते। नन्वेतत्कवेर्भूधरत्वे किं प्रमाणमत आह। अन्यथा एतत्कवेर्भूधरत्वाभावे एतत्कृतका
रुण्ये ग्रावापाषाणः कथं रोदिति। एवं चैतत्कृतकारुण्योत्तरकालीन पाषाणरोदनस्यैतत्संबंधाभावेन्यथानुपपत्त्या कवौ भूधरत्वसिद्धिः। एवं
च जन्यजनकभावसंबंधाद्रोदने पुत्रं नैव। एवंकार इवार्थ इति केचित्॥३६॥ जो नागरी शिखंडिनी प्राग्यथा शिखंडी तथावगच्छामि। प्रागल्भ्यम ८

(९)

धिकमवाप्तुं वाणी बाणो बभूवेति॥३७॥ प्राक्पूर्वं यथा शिखंडिनी द्रुपदपुत्री शिखंडी द्रुपदपुत्रत्वं प्राप्तवान् तथा वाणी सरस्वती अधिकप्रागल्भ्यप्रा
प्त्यर्थं बाणः कादंबरीकर्तृरूपाप्रभूत्। पवर्गतृतीयवकारयोरभेदादिति भावः। एवं च सरस्वती नाधिकत्वं बाणे घोष्यते। वस्तुतस्तु बवयोरैक्यदोषा
द्रुदयेव॥३७॥ यगणयंति गुरोरनुपस्यास्ते धर्मकर्मसंकुचितं। कविमिह मुञ्चान समिवनं तातं नीलांबरं वंदे॥३८॥ यं गुरोः प्रभाकरदेवं च तत्प्र
भाकरतंत्रनिपुणत्वं तातस्यावबुध्यते। पक्षे बृहस्पतेः अनुपश्चाद्गणयति। यस्य अस्ते नाशे पक्षे सूर्यमंडलमानां धर्मनादर्शनि धर्मकर्मसंकुचितं तातस
द्भास्यान्यस्य धर्मकर्मप्रवर्तकस्याभावादिति भावः। पक्षे मरुमासंदुवश्रुकास्तोपके यां चिलकर्मणां निषेधादिति भावः। यद्वा। यस्य तातस्य धर्मक
र्मधर्मं चाधर्मकर्मणो भावो व्यज्यते। संकुचितं सम्यक्कौ पृथिव्यां चितं व्याप्तं आस्ते क एवं च कर्मष्ठत्वेन सर्वत्र तातप्रसिद्धिरिति। यद्वा यस्याधर्म
कर्मविषये संकुचितं संकोचः भीतिरिति यावत् आस्ते। कविकाव्यकर्तारं पक्षे नन्नामानं उन्नानसामेव शुक्रमिव तत्प्रसिद्धं तातं नीलांबरमभि
धं यं दे॥३८॥ सकलकलाः कल्पयितुं प्रभुः प्रबंधस्य कुमुदबंधोश्च। सेनकुलतिलकभूपतिरेको राकाप्रदोषश्च॥३९॥ प्रबंधस्य चतुःषष्टि
कलाः कुमुदबंधोश्चंद्रस्य च षोडशकलाः कल्पयितुं वक्तुं कर्तुं वा पक्षे दर्शयितुं सेनकुलतिलकभूपतिः सेतुकर्ता प्रवरसेन नामा राजा पौर्णमा
सी प्रदोषः एकः प्रभुः समर्थः नान्य इत्यर्थः॥३९॥ काव्यस्याक्षरमैत्रीभाजो न च कर्कशा न च ग्राम्याः शब्दा अपि पुरुषा अपि साधव एवार्थबोधा
य॥४०॥ अक्षराणां वर्णानां एकवर्गपठितत्वादिरूपां एकस्थानकत्वे सति एकप्रयत्नरूपां वा भजति। तस्य एवं च बंधविरोधरागादित्वं व्यज्यते॥

[illegible marginal note]

गो·टी·

१

पुरुषविशेषणमप्यक्षरमैत्रीभाजइतिकाव्यस्यपोजनाविशेषवच्छब्दार्थोभिपस्य।अर्थबोधाय।नचकर्कशाःश्रुतिकरवःतेषांसाधकपर्श्वत्वादितिभावः।
पक्षेक्रूरमतयःएवंचपरोक्तिखंडनमात्रनिपुणत्वंव्यज्यते।नचग्राम्याःअविदग्धप्रयुक्ताःएवंचचारुत्वाभावोव्यज्यते।नचपक्षेग्राममात्रवासिनः।
एवंचकाव्यवासनावासितांतःकरणत्वाभावोध्वन्यते।शब्दाअपिपुरुषाअपिकिंतुसाधवएवव्याकरणसिद्धाएव।असाधुत्वज्ञानस्यार्थबोधप्रति
बंधकत्वात्पक्षेनिर्मलमतयएव।एवंचार्थप्रतिबिंबभवनयोग्यत्वंद्योत्यते।पद्य।काव्यार्थवासनाशालिनइत्यर्थः।एवंचान्येषांकाव्यबोधानर्ह
मितिभावः।।४०।।वंशोघुणइवनविद्यतिदोषोरसभावितसतांमनसि।रसमपितुनप्रतीघातिपक्षदोषःसन्निपातीवा।४१।।वंशोवेणोर्घुणइवकी
टइवरसभावितेश्रृंगारादिभावनावातेपक्षेजलशातिशापसंबंधवतिओषधीद्रवलेपक्वतीतिकाश्चित्।सतांमत्सररहितानांसहृदयानांवामनसि
मनस्वीसेकवचनेनसमीचीनमतसामेकव्यसनशालित्वंध्वन्यते।दोषःजविशतिएवंचस्फुटरसस्थिरस्वभावोद्योत्यते।वपुदोषःदोषेकदे
स्पक्षेक्षणेदाहःक्षणेशीतमस्थिसंधिरुजइत्यादिरूपपद्यवान्सन्निपातीवयुगपत्प्रकुपितवातपित्तादिमानुरसमपिशृंगारादिकमपि।एवंचा
वरूपच्छायायोग्यत्वंव्यज्यते।पक्षेमृगांकादिकमपि।एवंचकावार्ताकाथादरितिभावः।नप्रतीघातिनगरण्हातीतिकिंवक्तव्यमितिभावः।।४१।।विगु
णोपिकाव्यबंधःसाधूनामाननंगताःस्वदते।फूत्कारोपिस्फुवंशोरनुध्मानःश्रुतिंहरति।।४२।।विगुणोपिपपो।काव्यगुणास्तदन्यजमभ्रन्योपिका
व्यबंधःशब्दार्थोभिपरचनेत्यर्थः।एवंचअत्रबंधपदमधिकमाभाति।पद्य।बंधोरचनामात्रंसाधूनांएवंचगुणवत्तासंपादनकर्तृत्वंध्वन्यते।स्वद १

ते।स्फुरत्वसंपादकोभवति।स्फुवंशैःसरलैर्वेणुभिरनुध्मानःएवंचानुवादसंपादनेपिसुजनदुर्जनयोरंतरंभातीतिभावः।फूत्कारोपि।एवंचस्फुरत्वाजनक
त्वंध्वन्यते।श्रुतिंहरतिश्रवणसुखसंपादकोभवतीत्यर्थः।पद्य।स्वर्गाद्यर्थप्रतिपादकवेदविषयकश्रवणेच्छामपिदूरीकरोतीत्यर्थः।।४२।।स्वयमपिभूरि
छिद्रश्चापलमपिसर्वतोमुखंतन्वन्।तितउस्तुषस्यपिशुनोदोषस्यविवेचनेधिकृतः।।४३।।स्वयंभूरिछिद्रोपिबहुभावाच्छिद्रापि।एवंचस्वदो
षेषुदर्शनयोग्यत्वेपितद्दर्शनाभावेनभ्रांतत्वमावेद्यते।।पक्षेबहुरंध्रोपिसर्वतोमुखंसकलजनसमक्ष।पक्षेसर्वदिग्विषयंचापलंमौरव्यं १८
एवंचजनभीतिशून्यत्वंध्वन्यते।पक्षेचापल्यंतन्वन्विस्तारयन्एवंचाचिरस्वभावोध्वन्यते।।तितउः।तितउर्नाचालिनी।स्त्रियामित्यमरः।पि
शुनःपरोक्षपरसाहिछिद्रविवेचनेनिर्णयपक्षेस्वीकारअधिकृ[illegible]तःदत्ताधिकारःएवंचगुणादिकंविहायदोषमात्रग्राहिकारकर्तृत्वंदुष्टत्वामि
अचस्थःश्रो तिभावः।शितिरिति।अभ्यंतरगूढस्थितमान्यक्षेनिलीनान्।अर्थात्प्रतिपाद्यविषयान्पक्षेपदार्थान्अव्यंजयतःव्यंजनाविषयान्कुर्वतःप्रसंज
ग्रोत्रे प्रकाशयतःअतएवप्रसादेनकाव्यगुणेन।पक्षेनिर्मलतयारहितस्यसंदर्भस्यकाव्यस्य।नदस्येचपुंस्त्वनिर्देशे[illegible]ननिर्मलत्वस्यावश्यापे
क्षणीयत्वमित्यावेद्यते।पद्य।नदत्वेनचिरलतमानतुल्यप्रतिपादनात्काव्येअतिविरलत्वमावेद्यते।।उक्तंहि।द्विजा[illegible]वहिकवपुःद्विजाप्य ९
वकाव्यानीति।रसःश्रृंगारादिः।पक्षेजलरसज्ञानां।एवंचान्येषाप्रीतिजनकत्वेपिनकाचिक्षतिरितिभावः।श्रीसेन।।४३।।अंतर्गूढानर्थानव्यं
जयतःप्रसादरहितस्य।संदर्भस्यनदस्यचनरसःप्रीतेरसज्ञानां।।४४।। ×।। पदसेवनीयमसतांममतप्रायंस्फुवर्णोविन्यासः।।स्फुरसाध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो॰टि॰ मयं काव्यं त्रिविष्टपं वा समं विघ्नः॥४५॥ यत् असतां सहृदयभिन्नानां पक्षे पापवतां असेवनीयं अमृत
१० तुल्यं॥ पक्षे अमृतबहुलं॥ सुवर्णानां शोभनाक्षराणां विन्यासो ग्रथनं यत्र॥ वर्णं तु वाक्षर इत्यमरः॥ पक्षे सुवर्ण
स्य हेम्नः विन्यासो रचनादि यत्र॥ शोभनरसार्थो भिय प्रचुरं पक्षे देवसमूहबहुलं॥ काव्यं त्रिविष्टपं स्वर्गं वा समं
विघ्नः। एवं चाङ्गनान्यथाभाव आशंकनीय इति भावः। एवं च यथा स्वर्गार्थं यत्नः क्रियते तथा काव्यार्थं विधेय इति व्यज्यते॥४५॥ स
त्कविरसना शूर्पी निस्तुषतरशब्दशालिपाकेन॥ तृप्तो दयिताधरमपि नाद्रियते का सुधा दासी॥४६॥ सत्कवेः एवं चासत्कवेर्जि
ह्वाः रसनैव शूर्पी अल्पशूर्पं शूर्पी प्रस्फोटनं शूर्पमस्त्री समरः। यथा स्वल्पशूर्पेण निस्तुषता ज्ञाप्यते न तथा महाशूर्पेणेति स्त्रीसंप्रदा
यः। तया निस्तुषतरः निर्दोषः शब्दरूपो यः शालिस्तत्पाकेन परिणतनिर्दोषकाव्यास्वादेनेत्यर्थः। तृप्तो दयितायाः एवं चा
ति स्पृहणीयत्वमावेद्यते॥ अधरमपि अपि रुत्कृष्टतां व्यंजयति॥ न द्रियते का सुधा दासी॥ एवं च माध्वीकादेः कुत्र ग
णनेति भावः एवं च सुधातोऽपरे ततोऽपि सत्काव्येऽधिकत्वं ध्वन्यते॥ एवं च स्वर्गादिप्रियत्वं विहाय काव्यार्थमेव सविधे १०
य इति ध्वन्यते॥ अत्र च शारीरं तावदिष्टार्थव्यवच्छिन्ना पदावली तिरं डिमतेनार्थविशेषविशिष्टशब्दस्यैव का

व्यत्वमिति॥ प्रदीपकृन्मते च शब्दमात्रोपादानं॥४६॥ अकलितशब्दालंकृतिरनुकूला स्खलितपदनिवेशापि॥ अभिसारिकेव रमयति सूक्तिः सोत्कर्षशृंगारा
॥४७॥ अकलिता शब्दस्यालंकृतिर्यया॥ अनुप्रासादिशब्दालंकृतिशून्येत्यर्थः। एवं चार्थालंकारादिसत्त्वं व्यज्यते। पक्षे अकलितः शब्दो यया एतादृशी अलं
कृतिर्भूषणं यस्याः सशब्दभूषणवत्त्वे न्यस्य ज्ञानं भविष्यतीति धियेति भावः। अनुकूला द्रुतरसप्रत्यापिका पक्षे नायकचित्तानुकूल्यवती। स्खलितो बंध
दार्ढ्यशून्यः कोमल इति यावत् पदानां सुप्तिङन्तानां निवेशो ग्रथनं यस्याः सा एवं च गौडी रीतिर्युक्तेति ध्वन्यते। पक्षे स्खलितं स्थानादन्यत्र पतनं। एवं
प्रास॰। च संकेतगमने त्वरमाणं वेद्यते। पदनिवेशश्चरणविन्यासः यद्वा॥ अनुकूलानि स्फुटमर्थप्रतीतिजनकानि। अस्खलितानि व्याकरणनिष्पन्नानि। ए
वं च श्रेयार्थासाधुत्वदोषशून्यत्वं द्योत्यते। यानि पदानि तत्संनिवेशवती पक्षे अनुकूलानि। द्रुतसंकेतप्रापकानि स्खलनहीनानि यानि पदानि तद्विन्या 11
सवती। अपि रनास्थायां। एवं च गुणदोषाभावयोः संपादने नात्यन्तमाग्रह इति भावः। सोत्कर्षशृंगारा उत्कृष्टशालिशृंगाररसवती। पक्षे अरसस्यापमने
तिरति परिपोषवती अभिसारिकेव। अभिसरणाभिसारणान्यतरवती च। उक्तं च। कामार्ताभिसरेत्कांतं सारयेद्वाभिसारिकेति। एवं च प्रेमातिशयो व्य
ज्यते। सूक्तिः काव्यं पक्षे शोभनोक्तिमती रमयति। एवं च काव्ये शब्दालंकृतिदोषाभावसत्त्वसंपादनमप्रयोजकमपि तूत्कृष्टशृंगारसंपादनमेवा
चितमिति व्यज्यते। यद्वा। शब्दालंकृतिशून्यासदोषपदविन्यासा। अपि सोत्कर्षशृंगारा सूक्तिः रमयति। शब्दस्य प्राधान्यात्तदलंकारवत्त्वस्यावश्य
कत्वेऽपि तदभावे दोषराहित्यस्यावश्यकत्वेऽपि केवलोत्कृष्टशृंगारबलेनैव चमत्कारातिशयजनकत्वं काव्यस्येति भावः। एवं च शृंगारादिरसव
त्त्वं काव्ये वश्यमपेक्षितमिति व्यज्यते। अत एव नीरसो हि निबंधोऽपराधो महान् कवेः। मतेनाक्षविरेवस्यादन्येनास्मृतलक्षण इति ध्वनिकृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसस्यप्राधान्यमभ्यधायि॥ एवंचसर्वरसेषुप्रधानीभूतशृंगारवत्त्वमत्यंतोत्कृष्टमितितात्पर्यार्थः॥४७॥ अध्वनिपर
ग्रहपरंमदयतिहृदयंनवानवाश्रवणं॥ काव्यमभिज्ञसभायांमंजीरंकेलिवेलायां॥४८॥ अध्वनिर्व्यंग्यार्थशून्यं॥ यत्तुध्व
निरुत्तमंकाव्यंतद्भिन्नमित्यर्थइतितन्न॥ गुणीभूतव्यंग्यादेरपिहृदयाह्लादजनकत्वात्॥ पक्षेसिंजितशून्यंपरग्रहप
रं अनुप्रासमात्रार्थपरिग्रहः परमुत्कृष्टोयत्र॥ पक्षेअत्यंतचरणसंलग्नं॥ काव्यं॥ अभिज्ञसभायां॥ एवंचानभिज्ञसभायां
हृदयाह्लादजनकत्वेपिनकिंचित्फलमितिभावः॥ अत्रहृदयंवानमदयतिश्रवणंवानमदयति॥ एवंचश्रोतृरुभयान्य
तरदप्यानंदेनविषयांतरस्फूर्तिशून्यंनकरोतीतिभावः॥ अत्रहृदयंश्रवणंवानमदयतीत्येतावतैवसिद्धेऽपिद्वितीयन
वेत्यस्यनतथाप्रयोजनमाभाति॥ श्रवणंश्रोतुः हृदयंवक्तुर्नमदयति॥ आपरितोषाद्विदुषांसाधुमन्येप्रयोगविज्ञानमित्यादु
क्तेरितिव्याख्यानेवाकारद्वयमनयोरनर्थकमाभाति॥ मंजीरंक्रीडाकाले॥ मदनाविर्भाववंतंकरोतीत्यर्थः॥ का
व्यंहृदयंनमदयति॥ मंजीरंश्रवणंनमदयतीतिव्याख्यायांवाकारद्वयमनर्थकमाभाति॥ अत्रेदमवधेयं॥ व्यंग्यार्थ ३१
शून्यंकाव्यमेवनास्ति॥ नचाव्यंग्यमवरंस्मृतमित्युक्त्याव्यंग्यात्यंताभाववत्यपिकाव्यत्वमस्तीतिवाच्यंतदुदाहरणे

स्वच्छंदेत्यादिपद्येमंदाकिनीविषयकरत्यादिभावादिव्यंग्यस्यसत्त्वात्॥ किंबहुनासकोपिविषयोनास्तियत्रव्यंग्यंनभा
सते॥ समयादेर्विशेषस्यह्यभावेहेतुतामता॥ अतएवप्रधानगुणभावाभ्यांव्यंग्यस्यैवंव्यवस्थितेः॥ उभेकाव्यतदन्य
यत्तच्चित्रमभिधीयतइतिध्वनिकृताभ्यधायि॥ यद्वाकाव्यत्वाभिमतं॥४८॥ आस्वादितदयिताधर[illegible]सुधारसस्यैवसू
क्तयोमधुराः॥ अकलितरसालमुकुलेनकोकिलःकलमुदंचयति॥४९॥ आस्वादितः नतुपीतः एवंचाऽधरपानेऽत्यंताधर
पानेवाकीदृक्माधुर्यंउत्तरस्यतदितिनविद्मइतिभावः॥ दयिताधररूपसुधारसोयेनतस्यैव॥ एवंचनान्यस्येतिभावः॥ यद्वा
मधुराएवेतियोज्यं॥ एवंचमधुराणांव्यवच्छेदः॥ यद्वाआस्वादितौदयिताधरसुधारसौयेनतस्यैव॥ एवंचनृदेहेनदयिता
धरपानंविधायपश्चाद्देवरूपेणामृतंनिपीयैतदुभयाधिकतररसवत्काव्यंह्यपाकविर्भवतीतिभावः॥ एवंचदयिताधरास्वा
दादेहेतुत्वप्रतिपादनात्स्वासकार्यस्यकारणेऽनादरवत्काव्यास्वादवतःसकलविषयस्वादवतःमौलिभूतदयिताधररसास्वाद
दावप्यनादरइतिद्योत्यते॥ एवंचकाव्यास्वादेब्रह्मरसरूपताद्योत्यते॥ सूक्तयःकाव्यानिमधुराः एवंचेद्दयिताधरसुधारसयोः
अधिकतरत्वस्यकाव्यसामान्येभिधानेनतद्विशेषोत्तमकाव्येत्यंतविशेषत्तोध्वन्यते॥ अत्रदृष्टांतमाह॥ अनास्वादितचूतमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोटी·

१२ कुरुः मुकुलपदेन रससंभृतत्वं व्यज्यते। को किलः कलमधुरं नवदति। यद्वा सत्कयः ज्ञमकाव्यानि॥ ४९॥ बालाकयक्षसूत्रितमसती नेत्रत्रिभागकृ

तभाष्य॥ कविमाणका दूती व्याख्यानमभिधीयते। ५०॥ ओकव्यवहारज्ञानस्य काव्ये हेतुत्वमित्याह। बालायाः कटाक्षेण सूचितमित्यर्थः। एकंच त्रिंतर

लज्जावत्वेन प्राकट्यसंपादनायोग्यत्वं। अत्र बालापदेनाल्पवयस्काभिधीयते। नस्वीयाभेदरूपा। असतीत्वाद्यर्थविरोधात्। सख्या असतीत्वे

पि नायिकायाः स्वीयात्वाक्षतिरित्यपि केचित्। असत्या नेत्रत्रिभागेन वक्रलनेत्रव्यापारेण कृतभाष्यं कृतं किंचित्साकं दूती व्याख्यातं दृत्या कव

मरत्याभिहितं भावं अभिप्रायं कविमाणवकाः कवयो माणवका इवा एवं चाज्ञत्वं द्योत्यते। एवं चातितीक्ष्णमतिभिः सूत्रेणा ततोऽल्पमतिभिर्भाष्ये

ण ततोऽल्पमतिभिर्व्याख्यानेन यथावद्बुध्यते ग्रंथादिनीथातीक्ष्णमतिभिः कैश्चित्कविभिः स्वल्पव्यवहारज्ञानेन ततोऽल्पमतिभिरधिकतज्ज्ञाने

मर न ततोऽल्पमतिभिरधिकं तज्ज्ञानेन काव्यं किंमयत इति व्यवहारज्ञानं न कुत्रापि व्याभिचरतीति ध्वन्यते॥ यद्वा अन्यप्रमेयहरणशीलान्कवी

न्निंदति। दूती व्याख्यानमित्यनेन तस्मात्पदादयमर्थो बोद्धव्य इति नियमसहायशक्तिविषयमिति व्यज्यते। शाके रतिस्थूलमतिविषयत्वात्

असती नेत्रत्रिभागकृतभाष्यमित्यनेन जघन्यलक्षणावृत्तिविषयमिति द्योत्यते। लक्षणावृत्तेः किंचित्सूक्ष्ममतिविषयत्वात्। बालाकयक्ष

सूत्रितमित्यनेन व्यंजनावृत्तिविषयं व्यज्यते। व्यंजनावृत्तेरतिसूक्ष्ममतिविषयत्वात्। भावमर्थं। अर्थादन्यकविनिबंधं अधीयते स्वकी १२

यत्वविषयी कुर्वंति न ते कवयः सर्वे किंतु तेषु ते बालका मूर्खा इत्यर्थः॥ एवं च परकाव्यस्य वाच्यत्वस्य व्यंग्यार्थास्पर्शित्वं स्व

काव्यस्य ध्वन्यते॥ यद्वा बालाकटाक्षसूचनादिव्यापारप्रकटार्थस्य कविमाणवककाव्यविषयत्वं कवीनां त्वत्यंतनिगूढार्थो

पिकाव्यविषय इति स्वग्रंथेऽपि निगूढार्थविषयत्वं ध्वन्यते॥ अथवा कवयः सर्वे बालका इव। एवं च बालाकटाक्षसूत्रितामित्या

दिना नायिकया स्वेच्छया प्रकटीकृतभावस्याभिज्ञत्वं कवीनां न तु तदंतर्गताभिप्रायज्ञानवत्त्वमिति नायिकाधिक्यवर्णने

न तद्विषयशृंगारवर्णनं च सर्वरसवर्णनापेक्षया कठिनतरमिति व्यज्यते॥ तद्वत्वेन स्वग्रंथाधिक्यं च॥ अत एव शृंगारोत्तर

सत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रुत इत्याणि जयदेवेन॥ ५०॥ मसृणपदरीतिगतयः सज्जनहृदयाभिसारि

काः सुरसाः॥ मदनाद्वैतोपनिषदो विशदा गोवर्द्धनस्यार्याः॥ ५१॥ मसृणानां स्निग्धानां कोमलानामिति यावत्। पदानां विमस्तयंता

नारीतिर्वैदर्भ्यादिः तस्यां गतिः प्राप्तिर्यासु ताः तद्वत्य इत्यर्थः। पक्षे कोमलचरणविन्यासवत्यः लिगतयः मंथरगतय इत्यर्थः॥ 13

सज्जनहृदयमनुसंचरंति॥ एवं च सहृदयसमधिगम्यार्था इति भावः॥ एवं दुर्हृदयानामत्रानधिकार इति ध्वन्यते॥ पक्षे स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो० टी०
१२

ज्ञानस्यचतुरजनस्यहृदयमभिसारयंतिस्वाधीनताभाजनंकुर्वंतीतिताःसुष्ठुरसःशृंगारादिर्यासुताःपक्षेआसक्तिविशे
षवस्यःमदनाद्वैतोपनिषदः॥उपनिषदइत्यनेनमदनोद्दीपकत्तातिन्नायेन्नालित्वमावेद्यते॥पक्षेसन्निधिमदनसत्त्वोक्त्या
तस्मिन्नाज्ञाकारित्वंध्वन्यते॥विशदाःप्रसादरूपगुणवत्यःपक्षेउज्वलवेषाः॥आर्याःआर्याइतिछंदोनामपक्षेश्रेष्ठाः॥गोव
र्द्धनस्यगोवर्द्धनइतिकविनाम॥५१॥वाणीप्राकृतसमुचितरसाबलेनैवसंस्कृतंनीता॥निम्नानुरूपनीराकलिंदकन्येवगगन
तलं॥५२॥वाणीप्राकृतकाव्येसम्यगुचितःरसोयस्याःएतादृश्येवबलेनबलात्कारेणपक्षेबलरामेणएतत्कारोत्रैवान्वेति॥
संस्कृतंनीतानिम्नानुगामिस्वभावजलाकालिंदीगगनतलमिव॥एवंचप्राकृतकाव्येसुरसतासंपादनंसुगमतरंसंस्कृतका
व्येतुतत्कठिनतरमितिद्योत्यते॥तेनस्वयंतत्संपादनेनस्वस्मिन्नाधिक्यमावेद्यते॥यद्वावाण्याःस्वभावएवायंयत्प्राकृत
काव्येसरसतामाप्नोतीतिप्राकृतकाव्यकरणादरएवसमुत्तस्थापिसंस्कृतकाव्यएवादरोमयाविहितस्तत्रकदाचिद्यदितथाविधं
सुरसताभावोभविष्यतिसचतत्रभवद्भिःक्षंतव्यइतिध्वन्यते॥अथवाप्राकृतकाव्यसमुचितरसावाणीप्राकृतसमुचि

तरसैव।प्राकृतानांसाधारणजनानांसमुचितःक्रूरत्वावहइत्यर्थःरसोयस्याःअतोबलेनप्राकृतसमग्रशास्यादितिरस्कारेणसंस्कृतंनीता।यद्वा।प्राकृतेसाधा
रणजनेसमुचितअत्यंतइत्यर्थः।रसःप्रीतिर्यस्याःएतादृश्यपिबलात्कारेणसंस्कृतंसाधुरूपंप्रापिता।एवंचनीचाभिलाषिण्याःसद्गुणतासंपादनंपु
रुषार्थइतिभावः।निम्नानुरूपनीराकलिंदपर्वतकन्येव।एवंचविवेकशून्यत्वंध्वन्यते।एवंचनीचानुगामिरसशालितायोग्यत्वं।गगनतलंमस्त
कदेशंनीता।एवंचप्राकृतसंस्कृतयोर्भूतलगगनतुल्यताप्रतिपादनेनप्राकृतात्संस्कृतस्याधिक्यमावेद्यते॥५२॥इष्टं॥आर्यासप्तशतीयंप्रगल्भ
मनसामनादृतायेषां॥दूतीरहिताइवतेनकामिनीमनसिनिविशंते॥५३॥इयमार्याणांसप्तशतीयेषांप्रगल्भमनसांपैप्रागल्भमनोभिरित्यर्थः।ए
वंचाप्रगल्भमनोभिरादरोवाकृतेनकिंचित्फलमितिभावः।दूतीरहिताइवतेनकामिनीमनसिनिविशंते।एवंचइतोभिन्नंनकिंचिच्चातुर्यजनकमिति
व्यज्यते॥५३॥रसरीतिचीनवसनाप्रियेवशुद्धेववाङ्मुदेसरसा॥अरसासालंकृतिरपिनरोचतेशालभंजीव॥५४॥रसरीतिनीवीनंवसनंयस्याःरसावि
र्भावादितिभावः।एवंचालंकारभंशादेःकावार्तेतिभावः।प्रियेवशुद्धापि।अनुप्रासोपमाद्यलंकाररहितापिवाणीसंतोषाय।अत्रहेतुमाह।सर
साशृंगारादिमतीपक्षेशृंगाररसवतीरसशून्याअलंकृतियुतापि।पक्षेकटककुंडलयुतापिशालभंजीवप्रतिमेवनरोचते।एवंचरसस्यप्राणत्वप
रंध्वन्यते।एवंचनिरलंकारस्यकाव्यत्वमितिमिश्रकचिनाधमतेनउक्तमेवतथाभयांमंनुर्जिगमितियोगीन्द्रोमहात्माकुंभसंभवः।येनैकचुलुकेदृष्टौ
दिव्यौतौमत्स्यकच्छपौइतिनिरलंकारोदाहरणमभ्यधायि।यत्तुनतत्रएतदुभयोदाहृतपद्येपिसर्वालंकारमौलिमणिरूपातिशयोक्तेर्विद्यमानत्वा 15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो० टी.
१५

उक्तिवैचित्र्यरूपालंकारविरहे काव्यत्वस्यासंभवात् काव्यं ग्राह्यमलंकारा[illegible]दित्यलंकारस्य काव्यव्यवहारप्रयोज
कत्वाभिधानाच्चेद्रसवति काव्येसु यालंकारसाहित्येपि न चमत्कारहानिरिति रसवत्त्वस्याधिक्यप्रतिपादने तात्पर्यं अकलिते स्या
दिपद्येशृंगारोत्कर्षमात्रस्यप्राधान्यमर्थः॥ अत्रतुरसमात्रस्यत्वादिति भावः॥५४॥ इतिश्रीमद्गोदावरीपरिसरालंकृतपु
ण्यस्तंभस्थितिविराजमाननीलकंठपंडिततनूजबाळोपंडितात्मजत्तिमाजीपंडितांगजानंतपंडितकृते गोवर्द्धनसप्तश
तीव्यंगार्थदीपने यथारंभोचितवृज्याव्याख्यासमाप्तिमगमत्॥ ॥ अवधिदिनावधिजीवाः प्रसीदजीवंतुपथिकज
नजायाः॥ उल्लंघ्यवर्त्मनौ स्तनौ पिधेहि प्रपापालि॥१॥ कश्चिद्यौवनभराक्रांता प्रपापालिकामालोच्य तां प्रत्याह॥ प्रपाजलदानस्था
नं तद्रक्षणकर्त्री एवं च धार्मिकत्वं व्यज्यते॥ तेन च पथिकजनयानहं तव प्राद्रसुपदेशदानयोग्यत्वं जीवनरक्षणकृत्यजीवनं विना
शाकृतत्वमनुचितमिति वाच्यज्यते॥ प्रसीद॥ एवं च बलात्कारानर्हत्वं च ध्वन्यते॥ किंप्रसन्नतायाः फलमत आह स्तनौ पि
धेहि॥ मार्गांतरेण अनेनैव वा मार्गेण झटिति कुतो न गम्यते इत्यत्र हेतुगर्भं विशेषणमाह॥ उल्लंघ्यौ च तौ वर्त्मनौ ग्लौ च॥ एवं च मार्गां
तरीभावाद्रुद्ध्य पितुमशक्यता चैतत्पिधानमावश्यकमिति द्योत्यते॥ किं पिधानफलमत आह॥ अवधिदिनावधि जीवा जीव

नं यासां ताः पथिकजनजायाः जीवंतु॥ एवं च त्वत्कुचकनकमहीधरदर्शनलुब्धैः पथिकैरत्रैव कालातिवाहने कृते अवधिदि
नातिक्रमे तत्कामिनीजनस्य मरणमेव भविष्यतीति भावः॥१॥ अवैति त्वत्सुशीला सेवाचतुरा मनोनुकूला च॥ अजनि विनीता
गृहिणीसपदिसपत्नीस्तनोद्वेगा॥२॥ कृतपरिणयांतरं नायकमसूयमानां नायिकां काचिदुपदिशति॥ गृहिणी प्रथमस्त्री सपत्नी
स्तनप्रारूढनविसपदि॥ एवं च किंचिद्विलंबे को वेद किं भविष्यतीति भीतित्रालित्वं ध्वन्यते॥ अतिस्नेहवती समीचीनस्वभावा
सेवानिपुणा॥ नायकमनोगतकारिणी॥ नम्रा वजाता॥ एवं च पूर्वं सपत्नीसंपादनदुःखवत्त्वया न्यूनस्नेहं [illegible]सपत्नीतप[illegible]
र्जनादिना दुःशील त्वमपि यमेवसेवां करिष्यतीति सेवामोच्यं। अत एव मनःप्रातिकूल्यं किं करिष्यस्यमतः परं ममैसाविनीनता मकरोत्स
पत्नीनारुण्योद्गमसमयेचापमस्यामस्यंतासक्तः स्यादितिभियानिवात्सल्यादितिभावः। एवं च तपाप्येवं विधेयमतोधुनाऽस्त्यपाहि
करणमनर्थकमिति द्योत्यते। नायिकाकुत्राप्यागालिनं कंचनकश्चिद्विवाहांतरकरणमुपदिशति। एवं च सपत्न्यां जातापांइपमवरूप
मस्येतानुकूल्यमाचरिष्यतीति ध्वन्यते। काचित्कस्याश्चिद्वृत्तं वक्तीति केचन वः॥२॥ अपिकृतनिचुलमूलोच्छेदनदुःशील वीचिभा 15
चांके॥ नवविषयसपंकसारान चिरात्काचेरिभवितासि॥३॥ कश्चिद्दृष्ट्योन्मादवती निजकुलविद्वेषिणी मन्यो न्या वाक्ति॥ अपि

सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो. टी.
१५

कूलनिचुलस्तीरवृक्षः। यद्वा। निचुलो वंजुलो हिज्जलो विसमरादूक्षविशेषः एवं च तत्प्रतिपात्रे नमुचितमित्यावेद्यते। तस्य यन्मूलोच्छेदनं ए
वं च सैव्यत्वं ध्वन्यते। तत्र दुःशीलास्त्वत्कारिण्यः त्वद्दर्पस्ताभिः कुत्सितं वचनभाषिणि। कावेरि। बकस्य नतु हंसादे विघसो भोजनशेषः पः
पंकः क्षुद्रमत्स्यादेर्बकभुक्तत्वादिति भावः। स एव स्वादो यस्याः नचिराच्छीघ्रमेव भवितासि। एवं च परोपकारकारकस्य स्वकुलप्रभवस्य
मस्योन्मादवशान्म दुःखं ददासि तन्ने दुष्टभोजनविशेषद्व्यंजीघ्रमेव गामिष्यतीति ध्वन्यते। यद्वा संकेतितं तन्निचुलोच्छेदकारिणीं कांचित्प्राधि
विरहदुःखोद्रेकात्काचिज्जल्पति॥३॥ अयि विविधवचनरचनैर्दशासि चंद्रकरसमानीया॥ व्यसनादिवसेषु दूति पुनस्त्वं दर्शनीयासि॥४॥
काचिन्नायिका परपुरुषसंगमाय प्रलोभकारिणीं दूतीं प्रत्याह। हे दूति एवं च स्वकार्यमात्रसंपादकत्वं न तु अन्यदीयम्। ग्रिम कार्यं वि
चारकारित्वमिति द्योत्यते। नानाप्रकाररचनालि वचनरचनैः एवं च प्रलोभकारित्वं वचनानिपुणत्वाविश्वासानर्हत्वं तन्नरमसुतं
रकरणानर्हत्वं च ध्वन्यते। चंद्रसमानीय करैर्दशासि करगोचरं करोषि असंभाविनमप्यर्थजातप्रायं कृत्वा प्रदर्शयसीति भा
वः। व्यसनमपकीर्त्यादि तत्कालत्वं कुत्र दर्शनीयासि। एवं च लपाघटनामात्रं कर्तुं शक्यं न त्वपकीर्त्यादि निवारणमिति भावः।
यद्वा। भाविवियोगभीता नायिका संघटनमात्रकारिणीं दूतीं प्रत्याह। विविधवचनरचनैः इत्यनेन दुःप्रापोपि नायकस्त्वया
समानेतुं शक्य इति द्योत्यते। चंद्रमित्यनेनाह्लादजनकतापावहपस्तरहणीयत्वमावेद्यते। व्यसनं वियोगदुःखत्वादिति भावः। संकु १८

त्रदर्शनीयासि। एवं चाग्रे यथा वियोगो न भविष्यति तथा यदि त्वया कर्तुं शक्यं तर्हि त्वदुदीरितं संपादयामीति द्योत्यते॥४॥ अलमुत्कानि
लोको लांछनमपदिशतु हीयतामोजः। तदपि न मुंचति सत्त्वं बत स्फुधाच्छायामिव स्फुधांशुः॥५॥ अपकीर्त्यादिना स्वपरित्यागसंभावयंतीं ना
यिकां दूती समाधत्ते। लोको निर्निस्तेजस्कत्वमस्तु। जनः लांछनं अपवादं पक्षे कलंकं वदतु। ओजः यद्वशात्सर्वे पि बिभ्यति पक्षे प्रसा
दविशेषः हीयतां। तदपि स नायकः स्फुधांशुर्भ्रं छायामिव एवं च त्यागानर्हत्वं ध्वन्यते पक्षे स्फुधांशुतुल्यः एवं च स्पृहणीयत्वमावेद्य
ते। त्वां न मुंचतीत्यस्तीति। यद्वा पूर्वोत्तरमेतत्॥५॥ अतिचापलं वितन्वन्नंतर्निवसन्निकामकाठिण्यः॥ मुखरयसि स्वयमेतां सद्वृत्तां शंकु
रिव घंटां॥६॥ मामियं दुर्वचनैर्दुःखयतीति वादिनं नायकं प्रति नायिका सखि तवैवायमपराधो न तस्या इति याचिः। अंतर्निवसन् हृद
यमध्ये प्रविशन् तयास्वांते ध्वांपी सर्थः। यद्वा प्रथमतः साधुत्वं प्रदर्श्य हृदयं प्रविश्य तादृशाचरणं करोषि। संतानुचितकारित्वं त
वेत्यर्थः। पक्षे अंतर्मध्ये अतिचापलं अन्यनायिकासंभोगादिरूपं पक्षे निरंतरसंयोगविभागरूपं विस्तारयन् एवं चाज्ञानक्षमा
नर्हत्वं द्योत्यते। निकाममत्यंतकाठिण्यं कठिनत्वं यस्य सः एवं च चापल्यसंपादनेपि नम्रत्वं न करोषि। दुःखदत्वमसीति द्यो (16)
त्यते। पक्षे काठिण्यं अवमवसंयोगविशेषः। यद्वा अंतःसदनमध्ये एवं बाहिः स्थितो चापल्यं करोषि सदनमध्ये तु कार्कश्यमि
त्युभयतोपि दुःखदत्वमसीति द्योत्यते। स्वयं त्वमेव सद्वृत्तां सच्चारितां। एवं च तवासंचारितं विलोक्यमाववश्यमेतस्या दुःखं भवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिभावः। पुक्षेअसमीचीनवर्तुलांलोहकीलः घंयामि चैनांमुखरयति। एवं चतवैवायमपराधोनतस्याइतिभावः।६। अंगेपुजीर्यतिपरं
खंजनयूनोर्मनोभवप्रसरः। नपुनरनंतर्गर्भितविधिनिधरामंडलकेलिः॥८॥ कयोश्चिद्यूनोः संकेतनिकेतनाभावादेवनसंगमइति
काश्चित्कंचिदाह। खंजनयूनोः परमुत्कृष्टमनोभवस्य। एवंच सर्वत्रबाधाकालिंध्वन्यते। प्रसरः आधिक्यं अंगेपुजीर्यतिसमा
संभवति। यद्वापांकेवलंजीर्यतीतियोजना। परंतु अंतर्गर्भितो निधिर्यत्रएतादृशोधरामंडलकेलिर्नानिधिमप्यवेशएव खंजनयूनो
रितिप्रसिद्धिः। यद्वासखीअसंतगुप्तसंकेतंविनानैवकार्यकार्यमितिनायिकामुपदिशति। खंजनयूनोरित्यादिना तिर्यक्जातिमत्तयाविवेकशून्य
त्वेपिप्रचुरतरमन्मथविकारबलेप्यसंतगुप्तस्थलप्राप्तिं विनाखंजनयोरपिनरतिस्तत्राकिमुवाच्यंभवादृश्याः समीचीनपरीक्षितसंकेतस्थलं वि
नारतिर्नोचितेति ध्वन्यते। यद्वा। मन्मथविकलतयासद्यः संभोगमपेक्षमाणं नायिका नायकंवक्तीत्यपिप्रतिभाति॥७॥ अंधत्वमंधसमयेबधिर
त्वंबधिरकालआलंब्य। श्रीकेशवयोः प्रणयी प्रजापतिर्नाभिवास्तव्यः॥८॥ कश्चित्कंचिदुपदिशति। अंधसमयेक्रीडाकालेअवलोकनानर्ह
त्वादितिभावः। अंधभावं। बधिरकालेक्रीडाकालीनक्रीडाकरवाक्यकालश्चथैः पदैः पिशुनयच्चरहस्यवस्तु इत्यादिनारतारंभकाले श्लीलपदा
भिधानस्यकामशास्त्रेभिधानात्। बधिरभावमालंब्य प्रजानांपतिः एवंचमहद्भिरप्येतादृशारीत्यास्थीयतेतत्रकावार्तान्यस्येतिभावः। श्रीकेश
वयोः एवंचैतादृशासन्निधिः स्नेहश्च दुष्प्रापइति ध्वन्यते। प्रणयीप्रीतिमान्नाभिर्मध्यस्तत्रवसतिमान्। केशवनाभिवसतिमत्वाच्छ्रीकेशवयोः १६

स्मरतसमयेपिब्रह्मणोमध्यवर्तित्वमितिभावः। यद्वानाभौसविधेवास्तव्यंयस्यएवंचातिनैकट्यंध्वन्यते। अथवानाभिवसतिमानुभयोः प्रणयीजात
इत्यर्थः। यद्वाउभयोर्निसतानिध्यात्मजापत्यावुभयसानिध्यमेतेननाभिरवयवविशेषइत्यर्थेकेशवसंबंधवत्वेपिश्रीसंबंधाभावइत्यपास्तं। एवंचनि
करवसतिमात्रंनपुरुषार्थः किंतुप्रीतिविशिष्टनिकरवसतिरितिभावः। एवंचप्रभ्वादिसविधेप्रभ्वादिप्रीतिविशिष्टनिकरवसतिकामस्त्वमसित
र्ह्यनयैवरीत्यातिष्ठेतिध्वन्यते॥८॥ अयिकोशाकार कुरुषेवनेचराणांपुरोगुणोद्गारं॥ यन्निविदार्यविचारितजठरस्त्वंसखलुतेलाभः॥९॥ मूर्खसचि
धकृतपांडित्यमनवाप्ततत्फलतयाविन्नंकश्चिदन्योक्त्यासमाधत्ते। कोशाकारः कीटविशेषः वनेचराणां एवंचकार्याकार्यविवेकविधुरत्वंध्वन्य
ते। पुरः गुणानां तंतूनांउद्गिरणंकुरुषे। यद्विदार्यएवं चपश्चात्स्पतीकारानहत्वंव्यज्यते। विचारितंउदरंयस्य सः कृतएतेगुणानिःसरंतीतिविचारणाप
तिभावः। त्वंनास्ति खलुसतेलाभः एवंचमूर्खाणांमग्रेगुणप्रकटणंनकेवलमप्राप्तिकरमपित्वनर्थकरमितिध्वन्यते॥९॥ अगणितमहिमालं
घितगुरुरधनेहःस्तनंधयविरोधी। इष्टाकीर्तिस्त्यास्त्वपिरागःप्राणनिरपेक्षः॥१०॥ दूतीनायिकाप्रेमातिशयंनायकेव्यक्ति। अगणितः महिमायु
ळ्प्रतिष्ठायेन। महिमपदेन। तिस्पृहणीयत्वंध्वन्यते। लंघितः गुरुः श्वशुरादिर्येनतन्निषेधतिरस्कारादितिभावः। नविद्यतेधनेच्छायस्यस्त
नंधयोबालः एवंचातिस्नेहार्हत्वं ध्व॰। तद्विरोधीप्रसवोत्तरंअचिरात्संभोगस्तन्यहानिर्भवतीतिलौकिकं। इष्टाइच्छाविषयीभूताअकीर्तिर्य
स्या। एवंचाकीर्तिभीतिशून्यत्वंध्वन्यते। एतादृक्तस्यास्त्वपिरागः प्राणापेक्षाशून्यः एवंचातिशयप्रयालित्वंव्यज्यते॥१०॥ अपराधादधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं मां व्यथयति तव कपटवचनरचनेयं ॥ शस्त्राघातो न तथा सूची व्यधवेदनया यादृक् ॥११॥ कृतापराधं समाधानायारब्धकपटं नायकं नायिकाव
क्ति। अपराधादिति। अपराधादन्यांगनासंगमरूपात् त्वद्वेषणार्थमेव तत्र आगतमित्यादिकपटवचनरचना मामधिकं व्यथयति। एवं च तस्य भा
षिते अपराधोपि क्षंतुमर्ह इत्यावेद्यते। महतोपराधस्य नासंतदुःखदत्वमल्पायाः कपटवचनरचनायाः कथमलं तद्दुःखदत्वमित्यत्र दृष्टांतमाह।
शस्त्राघातः आघातपदेनासह्यत्वं व्यज्यते। न तथा व्यथयति यथा तत्र सूच्या व्यधः सीवनं तद्दुःखं। एवं च तत्सूचीकृतत्वेन नाल्पत्वमात्रं वाच्यमिति भा
वः। यद्वा। साधारण्येनोक्तिरियं ॥११॥ असती लोचनमुकुरे किमपि प्रतिफलति यन्मनोवर्ति। सारस्वतमपि चक्षुः सति तिमिरमिव तन्न लक्ष
यति ॥१२॥ कयाश्चिद्दुष्टतोरसतीकृतं क्षितमेकं दृष्ट्वा परोण ज्ञातं सर्वमिदं मयेसुंदरि तेन। किं चित्वया ज्ञातुं शक्यमित्यपरस्तं प्रत्य
ह। असत्यालोचयतीति लोचनमेव चेतस्ततः प्रसरणशीलत्वं ध्वन्यते। तद्रूपमुकुर मुकुरपदेन मंगलत्वेनायत्नदर्शनीयत्वं व्यज्यते
किमप्यनिर्वचनीयं मनोवर्ति। असत्या एवेति भावः। यद्वा। किमपि न लक्ष्ययतीति योजना। मनोवर्ति इत्यनेन निःसूक्ष्मत्वं तेन न बाहिः स्फु
टीभावानर्हत्वं द्योत्यते। प्रतिफलतीति। सारस्वतमपि चक्षुः सरस्वतीयत्वेनातीतानागतवस्तुग्रहणयोग्यत्वं ध्वन्यते। तिमिरमिवेति
मिराख्यदोषदूषितमिव न लक्षयति तत्प्रकारकं न वेत्तीति किं वाच्यमिति भावः। एवं च सारस्वतचक्षुषाप्येतादृशी गतिस्तत्र का वार्तातवे
ति भावः। एवं चासती लोचनव्यक्तीकृतमपि न ज्ञातुं शक्यं तत्र का वार्ता तच्चित्तगतमिति ध्वन्यते। यद्वा केवलं पंडितेन कयाक्षयंती मनस्तमीमा १७

लोच्यतं प्रति काचिदन्या वक्ति। सारस्वतं ज्ञानरूपं चक्षुस्तेन लक्षयत्यपि एवं च याथातथ्येन स्वरूपपरिचितिर्दुरापास्तेति भावः। एवं च कटाक्षि
तमपि न त्वयाज्ञायते इत्यंतजडत्वेन सर्वमपि त्वदीयाध्ययनमसत्कल्पमिति ध्वन्यते। यद्वा वयस्येनेदं ज्ञातमिति दुःखालुज्जितं युवानं प्रत्याह ॥१२
अन्यमुखे दुर्वादः स्वजनमुखे स एव परिहासः। इतरेंधनजन्मा यो धूमः सोगरुसंभवो धूपः ॥१३॥ नायकं दुर्वारकुपितां नायिकां सखी समाध
त्ते। अन्यस्यापि प्रियस्य मुखे यो दुर्वादः दुर्वचनं प्रियस्य दयितस्य मुखे स एव दुर्वाद एव स एवेत्यनेनान्यूनानतिरिक्तत्वं ध्वन्यते। परिहासः स
निंदरंजकं वाक्यं। अत्र दृष्टांतमाह। अगरुभिन्नेंधनजन्मा यो धूमः स रूपांतरानापन्नोगरुसंभवो धूपः। एवं चायं न दोषेण वदति किं तु कु
तुकेन नातः कोपो विधेयस्त्वयेति ध्वन्यते। यद्वा साधारणोक्तिरियं। अत्रैव विपरीतयोजनया अप्रियवदनविनिःसृतवचनं समीचीनमप्यस
मीचीनमेवेति ध्येयं। एवं च प्रेम्णो मुख्यत्वमावेद्यते। कथमेतादृशी येतादृशवचनमाकर्ण्य तूष्णीं स्थीयते त्वयेति वादिनीं सखीं नायिका समा
